# अन्ताराष्ट्रिययोगदिवसोत्सवः
# INTERNATIONAL YOGA-DAY CELEBRATION




विद्यापीठस्य योगचिकित्साकेन्द्रेण राष्ट्रियसेवायोजना-समित्या च २१.०६.२०१८ तमे दिनाङ्के प्रातः सप्तवादनात् प्रारभ्य अपराह्णे एकवादनं यावत् मान्यकुलपतीनां तत्त्वावधानेन अन्ताराष्ट्रिययोगदिवसोत्सवः यथाविधि पर्यपाल्यत । कार्यक्रमारम्भः महर्षिपतञ्जलेः विग्रहपूजनपूर्वक-पुष्पमालासमर्पणेन समभूत् । ततः विद्यापीठस्यान्तर्दौवारिकक्रीडाङ्गणे छात्राः, कर्मचारिणः, अध्यापकाः, अधिकारिणः तथा च योगचिकित्साशिबिरभागग्राहिणः सर्वेऽपि योगाभ्यासमकुर्वन् । विद्यापीठपरिसरात् तिरुपतिनगरे सन्दर्भेऽस्मिन् पदशोभायात्राऽपि समायोजि । एकादशवादनतः सार्धद्वादशवादनपर्यन्तं समायोजितायां योगसम्बोधनसभायाम् अध्यक्षाः विद्यापीठस्य मान्याः कुलपतयः आचार्य वि.मुरलीधर- शर्ममहोदयाः महर्षिपतञ्जलेः त्रिसहस्रवर्षेभ्यः पूर्वं विश्वस्य कृते प्रदत्तां ज्ञानविभूतिं संस्मरन्तः वर्तमानकाले योगं विना स्वास्थ्यसम्पादनं दुःसाध्यमिति प्राबोधयन् । विद्यापीठे 2018-19 शैक्षिकवर्षेऽस्मिन् B.Sc. (Yoga), M.Sc. (Yoga Therapy) इति नियमितपाठ्यक्रमस्य व्यवस्थीकरणेन ते आत्मतुष्टिं प्रादर्शयन् । उत्सवेऽस्मिन् श्री एन्.मुक्तेश्वररावमहोदयाः तिरुमलतिरुपतिदेवस्थानस्य विशिष्टप्रकल्पाधि-कारिणः मुख्यातिथिपदं व्यभूषयन्त । सम्पूर्णः कार्यक्रमः योगचिकित्सा-केन्द्रस्य निदेशकाः डॉ.राजेन्द्ररेड्डिमहोदयाः संमायोज्यन्त । उत्सवसन्दर्भे तैः संयोजकैः चत्वारिंशद्दिवसानां योगप्रशिक्षणशिबिरमेकं चालितं, यस्य मुख्यान्युद्देश्यान्यासन् — उच्चरक्तचापनिर्मूलनम् (Eradication of Hy-pertension), पृष्ठपीडा (Backache), मधुमेहनिर्मूलनम् (Eradica-tion of Diabetes) च । कार्यक्रमे तात्कालिककुलसचिवाः आचार्य सिहेच्.पि.सत्यनारायणमहोदयाः, सर्वेऽपि राष्ट्रियसेवायोजनासमितिसदस्याः, सर्वेऽपि कर्मचारिणः, अध्यापकाः, छात्राश्च समुपस्थिताः कार्यक्रममिमं सफल्यकुर्वन् ।